Mantra Pushpam

मन्त्रपुष्पम्

MANTRA · मन्त्राः

1 योऽपां पुष्पं वेद। पुष्पवान्प्रजावान्पशुमान्भवति।
चन्द्रमा वा अपां पुष्पम्। पुष्पवान्प्रजावान्पशुमान्भवति।
य एवं वेद।

2 योऽपामायतनं वेद। आयतनवान्भवति।
अग्निर्वा अपामायतनम्। आयतनवान्भवति।
योऽग्नेरायतनं वेद। आयतनवान्भवति।
आपो वा अग्नेरायतनम्। आयतनवान्भवति।
य एवं वेद।

3 योऽपामायतनं वेद। आयतनवान्भवति।
वायुर्वा अपामायतनम्। आयतनवान्भवति।
यो वायोरायतनं वेद। आयतनवान्भवति।
आपो वै वायोरायतनम्। आयतनवान्भवति।
य एवं वेद।

4 योऽपामायतनं वेद। आयतनवान्भवति।
असौ वै तपन्नपामायतनम्। आयतनवान्भवति।
योऽमुष्य तपत आयतनं वेद। आयतनवान्भवति।
आपो वा अमुष्य तपत आयतनम्। आयतनवान्भवति।
य एवं वेद।

5 योऽपामायतनं वेद। आयतनवान्भवति।
चन्द्रमा वा अपामायतनम्। आयतनवान्भवति।
यश्चन्द्रमस आयतनं वेद। आयतनवान्भवति।
आपो वै चन्द्रमस आयतनम्। आयतनवान्भवति।
य एवं वेद।

6 योऽपामायतनं वेद। आयतनवान्भवति।
नक्षत्राणि वा अपामायतनम्। आयतनवान्भवति।
यो नक्षत्राणामायतनं वेद। आयतनवान्भवति।
आपो वै नक्षत्राणामायतनम्। आयतनवान्भवति।
य एवं वेद।

7 योऽपामायतनं वेद। आयतनवान्भवति।
पर्जन्यो वा अपामायतनम्। आयतनवान्भवति।
यः पर्जन्यस्यायतनं वेद। आयतनवान्भवति।
आपो वै पर्जन्यस्यायतनम्। आयतनवान्भवति।
य एवं वेद।

8 योऽपामायतनं वेद। आयतनवान्भवति।
संवथ्सरो वा अपामायतनम्। आयतनवान्भवति।
यस्संवथ्सरस्यायतनं वेद। आयतनवान्भवति।
आपो वै संवथ्सरस्यायतनम्। आयतनवान्भवति।
य एवं वेद।

9 योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति।

Text checked against: A. Mahadeva Sastri and K. Rangacharya (eds.), The Taittiriya Aranyaka with the commentary of Bhattabhaskara Misra, vol. I, Government Branch Press, Mysore, 1900. Meanings, audio and all scripts at nityapaath.com/mantra-pushpam/